**શ્રી વિષ્ણુ પુરાણ અન્તર્ગતા**
**(પ્રથમામ્શે દ્વાદશાધ્યાચે)**
**॥ ધ્રુવ સ્તુતિ: ॥**

ભૂમિરાપો–નલો વાયુ: ખમ મનો બુદ્ધિરેવ ચ ।
ભૂતાદિ: આદિપ્રકુતિ: યસ્ય રૂપમ નતો–સ્મિ તમ ॥ 1

શુદ્ધસૂક્ષ્મો–ખિલવ્યાપી પ્રધાનાત્પરત: પુમાન ।
યસ્ય રૂપમ નમસ્તસ્મૈ પુરુષાય ગુણાત્મને ॥ 2

ભૂતાદીનામ સમસ્તાનામ ગન્ધાદીનામ ચ શાશ્વત: ।
બુદ્ધ્યાદીનામ પ્રધાનસ્ય પુરુષસ્ય ચ ય: પર: ॥ 3

તમ બ્રહ્મભૂતમ આત્માનમ અશેષજગત: પતિમ ।
પ્રપદ્યે શરણમ શુદ્ધમ ત્વદ્રૂપમ પરમેશ્વર ॥ 4

બ્રુહત્ત્વાત બ્રહ્મણત્વાત ચ યદ્રૂપમ બ્રહ્મસમ્જ્ઞિતમ ।
તસ્મૈ નમસ્તે સર્વાત્મન યોગિચિન્ત્યાવિકારિણે ॥ 5

સહસ્રશીર્ષા પુરુષ: સહસ્રાક્ષ: સહસ્રપાત ।
સર્વવ્યાપી ભુવ: સ્પર્શાત અત્યતિષ્ટત દશાઙ્ગુલમ ॥ 6

યદ્ભૂતમ યચ્ચ વૈ ભવ્યમ પુરુષોત્તમ તદ્ભવાન ।
ત્વત્તો વિરાટ સ્વરાટ સમ્રાટ ત્વત્તશ્ચાપિ અધિપૂરુષ: ॥ 7

અત્યરિચ્યત સો–ધશ્ચ તિર્યગૂર્ધ્વમ ચ વૈ ભુવ: ।
ત્વત્તો વિશ્વમિદમ જાતમ ત્વત્તો ભૂતમ ભવિષ્યતિ ॥ 8

ત્વદ્રૂપધારિણશ્ચાન્ત: સર્વભૂતમ ઈદમ જગત ।
ત્વત્તો યજ્ઞ: સર્વહુત: પ્રુષદાજ્યમ પશુર્દ્વિધા ॥ 9

ત્વત્તો રુચો–થ સામાનિ ત્વત્તશ્છન્દામ્સિ જજ્ઞિરે ।
ત્વત્તો યજૂમ્ષિ અજાયન્ત ત્વત્તો–શ્વા: ચ એકતોદત: ॥ 10

ગાવસ્ત્વત્ત: સમુદ્ભૂતા: ત્વત્તો–જા અવ્યો મ્રુગા: ।
ત્વન્મુખાદ્બ્રાહ્મણા બાહવો: તવ ક્ષત્રમ અજાયત ॥ 11

વૈશ્યાસ્તવોરુજા: શૂદ્રા: તવ પદ્ભ્યામ સમુદ્ગતા: ।
અક્ષ્ણો: સૂર્યો–નિલ: પ્રાણાત ચન્દ્રમા મનસસ્તવ ॥ 12

પ્રાણો ન: સુષિરાત જાત: મુખાત અગ્નિ: અજાયત ।
નાભિતો ગગનમ દ્યૌશ્ચ શિરસ: સમવર્તત ॥ 13

દિશશ્શ્રોત્રાત ક્ષિતિ: પદ્ભ્યામ ત્વત્તસ્સર્વમભૂદિદમ ।
ન્યગ્રોધ: સુમહાન અલ્પે યથા બીજે વ્યવસ્થિત: ।
સમ્યમે વિશ્વમ અખિલમ બીજભૂતે તથા ત્વયિ ॥ 14

બીજાત અઙ્કુરસમ્ભૂતો ન્યગ્રોધ્યસ્તુ સમુચ્છ્રિત: ।
વિસ્તારમ ચ યથા યાતિ ત્વયા સૃષ્ટમ તથા જગત ॥ 15

યથા હિ કદલી નાન્યા ત્વકપત્રાત અથ દ્રુશ્યતે ।
એવમ વિશ્વસ્ય નાન્યસ્ત્વમ ત્વત્સ્થાયીશ્વર દ્રુશ્યતે ॥ 16

હ્લાદિની સન્ધિની સમ્વિત ત્વય્યેકા સર્વસમ્સ્થિતૌ ।
હ્લાદતાપકરી મિશ્રા ત્વયિ નો ગુણવર્જિતે ॥ 17

પ્રુથગ્ભૂતૈકભૂતાય ભૂતભૂતાય તે નમ: ।
પ્રભૂતભૂતભૂતાય તુભ્યમ ભૂતાત્મને નમ: ॥ 18

વ્યક્તમ પ્રધાનપુરુષૌ વિરાટ સમ્રાટ સ્વરાટ તથા ।
વિભાવ્યતે–ન્ત:કરણે પુરુષેષ્વક્ષ્યો ભવાન ॥ 19

સર્વસ્મિન સર્વભૂતસ્ત્વમ સર્વ: સર્વસ્વરૂપધ્રુત ।
સર્વમ ત્વત્ત: તતશ્ચ ત્વમ નમસ્સર્વાત્મને–સ્તુ તે ॥ 20

સર્વાત્મકો–સિ સર્વેશ સર્વભૂતસ્થિતો યત: ।
કથયામિ તત: કિમ તે સર્વમ વેત્સિ હ્રુદિ સ્થિતમ ॥ 21

સર્વાત્મન સર્વભૂતેશ સર્વસત્ત્વસમુદ્ભવ ।
સર્વભૂતો ભવાન્વેત્તિ સર્વસત્ત્વમનોરથમ ॥ 22

યો મે મનોરથો નાથ સફલસ્સ ત્વયા ક્રુત: ।
તપશ્ચ તપ્તમ સફલમ યદ્દ્રુષ્ટો–સિ જગત્પતે ॥ 23

શ્રી:
શ્રીમતે રામાનુજાય નમ:

## ॥ ધ્રુવ સ્તુતિ સમ્પૂર્ણમ ॥